**द्वैतकोशः**

**१. अ**

१. **(अ)** 'अः इति ब्रह्म' (ऐत. ३.८.६) इत्युक्तेः ।

अकारवाच्यः गुणपूर्णः ब्रह्मशब्दवाच्यश्च विष्णुरेव ।

(आ) अः = बृहतीसहस्रम् ।

'स वा एष वाचः परमो विकारो यदेतन्महदुक्थम्' (ऐ.आ.उ. २.३.६, पृ. २३२) इत्युक्तेः अकारस्य उत्तमं व्याख्यानभूतं बृहतीसहस्रम् । तदुक्तं भगवत्पादैः — 'अकारवाग्विकारेषूत्तमो बृहतीसहस्राख्यः' (पृ. २३२)

**वाचकेषु तथा विष्णोः सहस्रबृहतीमयम् ।**
**उक्थमुत्तममुद्दिष्टं व्याख्याऽकारस्य सा परा ॥**
**अन्येऽपि शब्दाः सर्वेऽपि ह्यकारार्थाभिधायिनः ।**
**येषां परममुक्थं तत् ..................... ॥ (ऐ.भा. २३३)**

**२. अः** = जीवजडविलक्षणः सर्वदोषदूरः सर्वगुणपूर्णश्च । अकारस्य त्रयोऽर्थाः कोशनिरुक्तादिषु प्रथिताः । उक्तं च वाक्यनिर्णये - 'अन्यता च निषेधश्च विरुद्धत्वमिति त्रयः अकारार्थाः' इति । (ए.भा.२८१)

जीवजडेभ्यः परमार्थत एव भिन्नत्वं परमात्मनः प्रतिपादयत्यकारः । दोषानशेषान् प्रतिषेधति च 'निरनिष्टो निरवद्य' इत्यादिना । दोषान् प्रतिषेधयन्ती भगवती श्रुतिः तद्विरुद्धान् गुणानपि स्फुटमभिदधति - 'यः सर्वज्ञः' 'सत्यकामः सत्यसङ्कल्प' इत्यादिना । एवम् अकारस्य विष्णुनामत्वं गुणप्रतिपादकत्वं च स्फुटम् ।

अकारेण योऽर्थः प्रतिपादितः स एव वेदादिभिः विवृतः । अकारः व्याख्येयः । वेदादयः व्याख्यानभूताः तदुक्तम् -

**अकारः प्रथमं नाम विष्णोः सर्वगुणान् ब्रुवन् ।**
**सर्वदोषविरुद्धत्वाद् गुणानामन्यतामपि ॥**
**विष्णोर्वदति जीवेभ्यो जडेभ्यश्चैव सर्वदा ।**
**अभावं चैव दोषाणां सर्वेषां केशवे वदेत् ॥**
**सम्यग् वक्तृत्वतस्तस्मादकारो मुख्यनाम हि ।**
**तदर्थानेकदेशेन शब्दाः सर्वेऽपि चोचिरे ॥**
**व्याख्याव्याख्येयरूपत्वं विकारित्वमिहोदितम् । (ऐ.भा.२३२)**

(३) अः = अकारव्याख्यानभूतं वाङ्मयं पञ्चविधम् । बृहतीसहस्रस्य समग्रवाङ्मयप्रपञ्चस्य च व्याख्येयभूतमकारं पञ्चविधम् । पञ्चविधमपीदम् अकारव्याख्यानम् । तदुक्तं - 'अकारो वै सर्वा

२९७७. संसर्गः

ए. अधिकरणतातिरिक्त संसर्गा भाव समर्थतम् ।। (मां.रा.सं.स.पृ.सं.१४४, द्वै.द्यु.२६)

विमतः भिन्नः मुक्तत्वात् इति मुक्तौ भेदसाधकम् अनुमानम् । अत्र मुक्तत्वं नाम संसारप्रध्वंसो वा संसारसंसर्गाभावो वा नाद्यः ध्वंस प्रतिप्रतियोगिनः कारणत्वात् परमात्मनि संसारस्याभावात् तद्ध्वंसोऽपि न वर्तेते । अतः परमात्मन्यसिद्धेः । निगड....मुक्तादि दृष्टान्तस्य साधनवैकल्यापत्तेश्च । अत एव न द्वितीयोऽपि इति चेन्नैवं वक्तव्यम् । अविवक्षित विशेषसंसर्गभावस्य हेतुत्वात् ।

यदत्र केनचिज्जाल्मेन जल्पितम् - यत्तु मुक्तत्वात् इत्यस्य बन्धसंसजर्गाभावादित्यर्थः इति तदसत् । अभाववत्वस्यैव हेतुत्व सम्भवे इतरांशवैयर्थ्यात् ।

यथा हि - तत्संसर्गाभाव एव तदभावः । अतः अनेनैव पूर्वोक्त दोषपरिहारसम्भवे अन्यद्विषेशरं व्यर्थम् इति । यदत्र पण्डितम्मन्येनोक्तम् । तथा सति प्रमेयत्वादीना केवलान्वयित्वभङ्गपद्रसङ्गः । तत्रापि - प्रयेयत्वं नाम प्रमाविषयत्वं । तथा च विषयतायाः एव केवलान्वयित्वस्य सुवचत्वादिति तदुपहसनीयमेव । स्वसमानाधिकरणव्याप्यता वच्छेदकधर्मान्तराघटितधर्मस्यैव दुर्वारत्वात् नव्यमतेऽव्या......क्येन निग्रहे तस्यानुत्तरत्वात् । अभ्युपगतश्च तन्त्रिकैराधिक्येन निग्रहः । स च हेत्वाधिक्यवद्धेतुविशेषणाधिक्येऽपि तुल्यः । अन्यथा वह्निमान् काकदन्तग्रहविषयधूमात् इति प्रयुञ्जानो न निगृह्येत ।

२९७७. अधिकरणातिरिक्तसंसर्गाभावसमर्थनम् - (अभि.तं.ता.६०)

भाट्टाः तावत् अभावम् अधिकरणस्वरूपम् इति मन्यन्ते । एवं तं विषय साधयन्ति । यथा हि- यदि घटाभावः भूतलाद्भिद्येत तदा वक्तव्यम् । किं घटा भावः घटवति भूतले सम्बध्यते एत तदभाववति । नाद्यः । घट तदभावयोः विरुद्धत्वात् नैकत्र सम्बध्यते । अपि च घटवति भूतले घटो नास्तीति बुद्धिप्रसङ्गच्च । द्वितीये वक्तव्यम् । घटाभावसम्बन्धघटकी भूतोऽभावः स एव उतान्यः । आद्ये स्वात्मकाभावस्य स्वस्यवाश्रयत्वात् आत्माश्रयः । द्वितीये त्वनवस्था । तादृशाभावस्यापि अभावत्वात् अभावान्तरापेक्षः । तस्यापि अन्याभावस्य इति आत्माश्रयः । न तु एवं विकल्पे सति घटः किं स्वाभाववति सम्बध्यते उत घटवति । नाद्यो विरुद्धत्वात् । द्वितीयेऽपि घटसम्बन्धघटकी भूतः घटः स एव उतान्यः । नाद्यः आत्मश्रयत्वात् न द्वितीयः अनवस्था इति वक्तुं शक्यत्वात् घटादेरप्यपलापः स्वयं सम्बध्यते इत्यङ्गीकारात् घटाभावात्मकभूतले घटः सम्बध्यते इति वक्तुं शक्यत्वात् । न च तत्र विरोधादसम्भवः । सामानाधिकरण्यस्यैव विरुद्धत्वेन भावाभावयोः आधाराधेयभावस्याविरुद्धत्वात् ।